वृष्टिफलं यथा,—
"पतिव्रताया वचनान्नोद्गच्छति दिवाकरः ।
सूर्य्योदयं विना नैव स्नानदानादिकाः क्रियाः ।
नास्मिंश्चिरयत्येव क्रतुभावश्च लक्ष्यते ।
नैवाप्यायनमस्माकं विना होमेन जायते ॥
वयमाप्यायिता मर्त्यैर्यज्ञभागैर्यथोदितैः ।
वृष्ट्यादिनाशुयज्ञोऽसौ मर्त्यान् शस्यादिसिद्धये ।
निष्पादितास्वोषधीषु मर्त्या यज्ञैर्यजन्ति नः ।
एषां वयं प्रयच्छामः कामान् यज्ञादिपूजिताः ॥
अधो हि वर्षाम वयं मर्त्याश्चोर्द्ध्वप्रवर्षिणः ।
तोयवर्षेण हि वयं हविर्वर्षेण मानवाः ॥
येऽस्माकं न प्रयच्छन्ति नित्या नैमित्तिकीः
क्रियाः ।
क्रतुभागं दुरात्मानः स्वयं येऽश्नन्ति लोलुपाः ॥
विनाशाय वयं तेषां तोयसूर्य्याग्निमारुतैः ।
क्षितिञ्च संदूषयामः पापानामपकारिणाम् ॥
दुष्टतोयादिदोषेण तेषां दुष्कृतकारिणाम् ।
उपसर्गाः प्रवर्त्तन्ते मरणाय सुदारुणाः ॥
ये चास्मान् प्रीणयित्वा तु भुञ्जते शेषमात्मना ।
तेषां पुण्यानहं लोकान् वितरामो महा-
त्मनाम् ॥"
इति मार्कण्डेयपुराणे पतिव्रतामाहात्म्यनामा-
ध्यायः ॥ * ॥ वृष्टिजलगुणाः ।
"गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने ।
बल्यं रसायनं मेध्यं पात्रापेक्षि च तत्परम् ॥
दिवार्ककिरणैर्जुष्टं सृष्टमिन्दुकरैर्निशि ।
अरूक्षमनभिष्यन्दि तत्तुल्यं गगनाम्बुना ॥
वर्षासु चरन्ति घनैः सहोरगा विषति कीट-
लूताश्च ।
तद्विषजुष्टमपेयं स्वजलमगस्त्योदयात् पूर्व्वम् ॥
कालेन पक्वं निर्दोषमगस्त्येनाविषीकृतम् ।
हंसोदकमिति ख्यातं शारदं विमलं जलम् ॥"
इति राजवल्लभः ॥ * ॥
अथ तस्य भेदाः ।
"पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति
द्विधा ।
दिव्यं चतुर्व्विधं प्रोक्तं धारजं करकाभवम् ॥
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥" *
तत्र धारस्य लक्षणं गुणाश्च ।
"धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
शिलायां वसुधायां वा धौतायां पतितं च यत् ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते ।
भाजने मृण्मये चापि स्थापितं धारमुच्यते ॥
धारनीरं त्रिदोषघ्नमनिर्देश्यरसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम् ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत् पथ्यं विशेषात् प्रावृषि
स्मृतम् ॥" * ॥
अथ धाराजलस्य भेदौ ।
"धाराजलञ्च द्विविधं गाङ्गसामुद्रभेदतः ।"
तत्र गाङ्गसामुद्रयोर्लक्षणं गुणाश्च ।
"आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता वृष्टीः कुर्व्वन्तीति वचः सताम् ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्व्वथा तज्जलं देयं तथैव चरके वचः ॥
स्थापितं हैमने पात्रे राजते मृण्मयेऽपि वा ।
शाल्यन्नं येन संसिक्तं भवेदक्लेदिवर्णवत् ॥
तत् गाङ्गं सर्व्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ।
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम् ॥
विस्रं दोषलं तीक्ष्णं सर्व्वकर्म्मसु गर्हितम् ।
सामुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ॥
यतोऽगस्त्यस्य विप्रर्षेरुदयात् सकलं जलम् ।
निर्म्मलं निर्व्विषं स्वादु शुक्लं स्याददोषलम् ॥" *
अतएवाह ।
"फुत्कारविषवातेन नागानां व्योमचारिणाम् ।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥"
इति भावप्रकाशः ॥
वृष्टिघ्नी, स्त्री, भद्रपर्णिका । इति शब्दचन्द्रिका ॥
गुजराटी एकारच इति भाषा । वृष्टिनाशके,
त्रि ॥
वृष्टिजीवनः, पुं, ( वृष्ट्या वृष्टिर्व्वा जीवनं यस्मिन् ।)
देवमातृकदेशः । इति हेमचन्द्रः ॥ वृष्टि-
जीवने, त्रि ॥
वृष्टिभूः, पुं, (वृष्टौ वर्षाकाले भूरुत्पत्तिर्यस्य ।) भेकः ।
इति हारावली ॥ वृष्टिभवे, त्रि ॥
वृष्णिः, पुं, ( वृष + "सृवृषिभ्यां कित् ।" उणा० ४
४६ । इति निः । स च कित् ।) मेषः । इत्यमरः ॥
यादवः । इति शब्दरत्नावली ॥ ( यथा, महा-
भारते । ५ । ७२ । ४ ।
"यथा हि सर्व्वास्वापत्सु पासि वृष्णीनरिन्दम ।
तथा ते पाण्डवा रक्ष्याः पाह्यस्मान्महतो
भयात् ॥")
इन्द्रः । इति त्रिकाण्डशेषः ॥
वृष्णिः, त्रि, पाषण्डः । चण्डः । इति शब्दरत्ना-
वली ॥
वृष्णिगर्भः, पुं, श्रीकृष्णः । इति हारावली ॥
वृष्यं, क्ली, ( वृष + "विभाषा कृवृषोः ।" ३ । १ ।
१२० । इति क्यप् । ) वाजीकरम् । इति राज-
निर्घण्टः ॥
वृष्यः, पुं, ( वृषाय हितः । वृष + यत् । ) माषः ।
इति हेमचन्द्रः ॥
वृष्यः, त्रि, ( वृषाय कामुकाय हितः । वृष +
"खलयवमाषेति ।"५।१।७। इति यत् । ) शुक्र-
वृद्धिकारकौषधादिः । इति भावप्रकाशः ॥
वृष्यकन्दा, स्त्री, ( वृष्यं बलकारकं कन्दं यस्याः ।)
विदारी । इति राजनिर्घण्टः ॥
वृष्यगन्धा, स्त्री, ( वृष्यो गन्धो यस्याः । ) वृद्ध-
दारकः । इति शब्दरत्नावली ॥
वृष्यगन्धिका, स्त्री, ( वृष्यो गन्धो यस्याः । स्वार्थे
कन् । टापि अत इत्वम् । ) अतिबला । इति
राजनिर्घण्टः ॥
वृष्यवल्लिका, स्त्री, विदारी । इति राजनिर्घण्टः ॥
वृष्या, स्त्री, ऋद्धिनामौषधम् । इति रत्नमाला ॥
शतावरी । आमलकी । इति राजनिर्घण्टः ॥
बृह, वृद्धौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-
अक०-सेट् । ) बर्हति । वृहिर्वृहर्योरित्यने-
नैवेटसिद्धेरस्य पाठो वृद्धौ इरनुबन्धप्रकरणार्थः ।
किन्तु अनेनैवेटसिद्धे तत्र कुहि ग्रहणं परस्मा-
गुहणार्थमेव । अयं धातुः कैश्चिन्न मन्यते ।
इति दुर्गादासः ॥
बृह, इ ध्वने । उद्यौ । सप्तमस्वरी ॥ ( भ्वा०-पर०-
अक०-सेट् ।) इ, बृंहति । बबृंहिरे गजपतयः ।
इति माघः ॥ आत्मनेपदं प्रमादादिति वल्लभः ॥
ध्वनतीति हस्तिकर्त्तृकः । बृंहितं करिगर्जित-
मित्यमरसिंहात् । बृंहितं करिगर्जायां शब्द-
मात्रेऽपि कथ्यते । इति शब्दमहार्णवात् ।
कदाचिदन्यकर्त्तृकोऽपि । तेन श्रीहर्षचरिते
सिंहबृंहितमिति बाणभट्टप्रयोगः । इति दुर्गा-
दासः ॥
बृह, इ कि त्विषि । इति कविकल्पद्रुमः ॥ (चुरा०-
पक्षे भ्वा०-पर०-अक०-सेट् । ) सप्तमस्वरी ।
इ, बृंह्यते । कि, बृंहयति बृंहति । इति
दुर्गादासः ॥
बृह, इ ङ वृद्धौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-
आत्म०-अक०-सेट् । ) इ, बृंह्यते । ङ, बृंहते ।
इति दुर्गादासः ॥
बृह, इर् ध्वने । उद्यौ । इति कविकल्पद्रुमः ॥
( भ्वा०-पर०-अक०-सेट् । ) इर्, अबृहत् ।
अबर्हीत् । ध्वनः शब्दः । उद्यतिर्वृद्धिः । इति
दुर्गादासः ॥
बृह, श क उद्यमे । इति कविकल्पद्रुमः ॥ (तुदा०-
पर०-अक०-वेट् ।) श, बृहति । क, अबर्हीत् ।
अबृक्षत् । इति दुर्गादासः ॥
बृ(वृ)हच्चञ्चुः, पुं, ( बृहती चञ्चुः शाकविशेषः ।)
महाचञ्चुशाकः । इति राजनिर्घण्टः ॥ (बृहती
चञ्चुर्यस्येति दीर्घचञ्चुयुक्ते, त्रि ॥)
बृ(वृ)हच्चित्तः, पुं, जम्बीरः । इति शब्दचन्द्रिका ॥
बृ(वृ)हच्छल्कः, पुं, (बृहन् शल्को यस्य ।) चिङ्गट-
मत्स्यः । इति जटाधरः ॥
बृ(वृ)हज्जीवन्ती, स्त्री, बृहज्जीवन्तिकाख्यः ।
तत्पर्य्यायः । जयभद्रा २ प्रियङ्करी ३ मधुरा ४
जीवपुष्पा ५ बृहज्जीवा ६ यशस्करी ७ । अस्या
गुणाः । बहुवीर्य्यदाढ्यत्वम् । भूतविद्रावणत्वम् ।
वेगाङ्गनियामकत्वञ्च । इति राजनिर्घण्टः ॥
बृ(वृ)हड्ढक्का, स्त्री, ( बृहती ढक्का । ) ढक्का-
विशेषः । यथा,—
"बृहड्ढक्का तु भेरी स्त्री पुमान् दुन्दुभिरा-
नकः ।
डमरुः प्रतिपत्तूर्य्यमानकः पटहोऽस्त्रियाम् ॥"
इति जटाधरः ॥
बृ(वृ)हतिका, स्त्री, (बृहती + "बृहत्या आच्छा-
दने ।"५ । ४ । ६। इति स्वार्थे कन् ।) उत्तरीय-
वस्त्रम् । इत्यमरः ॥ बृहती । इति रत्नमाला ॥
बृ(वृ)हती, स्त्री, ( बृहत् + गौरादित्वात् ङीष् । )
क्षुद्रवार्त्ताकी । व्याकुड़ इति भाषा । तत्पर्य्यायः ।
महती २ कान्ता ३ वार्त्ताकी ४ सिंहिका ५